यथाऽनलः" भा० वि० २अ० । "आर्य्यरूपसमाचारं चरन्तं कृतके पथि" भा०आनु० २६०७ श्लो० "कच्चिन्न कृतकैर्दूतैरित्यादि" कच्चिदध्यायशब्दे दर्शितम् । "कृतकं कामिनि चुचुवे मृगाक्ष्या" माघः । २विड्लवणे न० अमरः ।

**कृतकर्म्मन्** त्रि० कृतं कर्म्म येन । १दक्षे चतुरे कार्य्यक्षमे हेम० । २कृतस्वकार्य्ये च "यावदस्तं न यात्येष कृतकर्म्मा दिवाकरः" रामा० । कर्त्तव्यताशून्ये ३परमेश्वरे पु० । "इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृतागमः" विष्णु स० "कृतमेव न कर्त्तव्यं किञ्चित् कर्म्मास्य विद्यते धर्म्मात्मकं कर्म्म कृतं वा कृतकर्म्मा" भा० । कृतकार्य्यकृतकृत्यादयोऽप्यत्र त्रि० "समूहकार्य्यआयतान् कृतकार्य्यान् विसर्ज्जयेत्" या०स्मृ० । "यथेष्टं गम्यतां तत्र कृतकार्य्योऽयं त्वया" भा०आनु०२८६२श्लो० । "कृतकृत्योविधिर्मन्ये न वर्द्धयति तस्य ताम्" माघः । ५ऋणत्रयाद्विमुक्ते संन्यासिनि । "ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः । नैवास्ति किञ्चित् कर्त्तव्यमस्ति चेन्न स तत्त्ववित्" इत्युक्त्या तस्य समाप्तकृत्यत्वात्तथात्वम् "कृतकृत्यस्तु संन्यस्य स्वात्मन्यात्मरतिर्भवेत्" । अकृतकृत्योहि मृत्योर्बिभेति यथाह "प्रायेणाकृतकृत्यत्वान्मृत्योरुद्विजते जनः" इति ।

**कृतकाल** त्रि० कृतः कालः समयो येन । १कृतावधौ शिष्यादौ । कर्म्म० । २कृते समये पु० "कृतशिल्पोऽपि निवसेत् कृतकालं गुरोर्गृहे" या० । कृतसमयादयोऽप्यत्र [च त्रिका० ।

**कृतकोटि** पु० कृता कोटिर्येन । १काश्यपमुनौ २उपवर्षमुनौ

**कृतक्रिय** त्रि० कृता क्रिया येन । कृतनित्यादिकार्य्ये "विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् । वैश्यः प्रतोदं रश्मीन् वा यष्टिं शूद्रः कृतक्रियः" मनुः ।

**कृतक्षण** त्रि० कृतः क्षणः समयो येन । लब्धावकाशे । "तमुतङ्कः प्रत्युवाच कृतक्षण एवास्मि शीघ्रमिच्छामि यथोपपन्नमन्नमुपस्कृतम्" भा० आ० ३अ० । कृतसमयादयोऽप्यत्र

**कृतघ्न** त्रि० कृतं हन्ति हन–टक् । कृतोपकारस्यापकारके "शरणागतदीनस्त्रीहिंसकान् संवसेन्न तु । चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्" या० स्मृ० "बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्म्मतः । शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्" मनुः

"कृतघ्नानाह स्कान्दपुराणम् "भर्तृपिण्डापहर्त्ता च पितृपिण्डापहारकः । तस्माद्दृष्टहीत्वा विद्याञ्च दक्षिणां न प्रयच्छति । पुत्रान् स्त्रियश्च योद्वेष्टि यश्चैतान् घातयेन्नरः । कृतस्य दोषं वदति सकामान्न करोति यः । कारयेन्न कृतं यश्च आश्रमान् यस्तु दूषयेत् । सर्वांस्तान्ऋषिभिः सार्द्धं कृतघ्नानब्रवीन्मनुः" "ब्रह्मघ्ने च सुरापे च चौरे च गुरुतल्पगे । निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः" । "तस्मात् पित्रादिगुरोः कृतस्य सत्कर्म्मणइति शेषः । सकामान्न करोति उपकर्तृनिति शेषः" प्रा० त० रघुनन्दनः ।

**कृतघ्नोपाख्यान** न०कृतघ्नविशेषस्योपाख्यानम् । भारतशान्तिपर्व्वान्तर्गते १६८ अध्यायमारभ्य १७३ अध्यायपर्य्यन्ते ग्रन्थे नाडीजङ्घशब्दे विवृतिः । "कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखम् । अश्रद्धेयः कृतघ्नोहि कृतघ्ने नास्ति निष्कृतिः । मित्रद्रोहो न कर्त्तव्यः पुरुषेण विशेषतः । मित्रध्रुक् नरकं घोरमनन्तं प्रतिपद्यते । कृतज्ञेन सदा भाव्यं मित्रकार्य्येण चैवह । मित्राच्च लभते सर्व्वं मित्रात् पूजां लभेत च । मित्राद्भोगांश्च भुञ्जीत मित्रेणापत्सु मुच्यते । सत्कारैरुत्तमैर्मित्रं पूजयेत विचक्षणः । परित्याज्यो बुधैः पापः कृतघ्नो निरपत्रपः । मित्रद्रोही कुलाङ्गारः पापकर्म्मा नराधमः । एष धर्म्मभृतां श्रेष्ठ ! प्रोक्तः पापो मया तव । मित्रद्रोही कृतघ्नोवै किंभूयः श्रोतुमिच्छसि" । भा०आ०१७३अ०

**कृतच्छिद्रा** स्त्री कृतं छिद्रं यस्याम् । कोषातकीलतायाम् । राजनि० ।

**कृतज्ञ** त्रि० कृतं कृतोपकारं जानाति ज्ञा–क । १कृतोपकारज्ञातरि २तत्प्रत्युपकारके । "कृतज्ञेन सदा भाव्यम्" भा० शा० १७२ अ० । ३कुक्कुरे पु० मेदि० स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप् । कृतं कार्य्यं जगत् जानाति ज्ञा–क, कृतं कार्य्यं ज्ञआत्मा यस्य वा । ४ परमेश्वरे पु० "महर्षिः कपिलाचार्य्यः कृतज्ञोमेदिनीपतिः" विष्णु स० "कृतज्ञतामस्य वदन्ति सम्पदः" किरा० ।

**कृतत्रा** स्त्री कृतं त्रायते त्रै–क । त्रायमाणालतायां राजनि०

**कृतदास** पु० कर्म्म० । एतावत्कालं त्वद्दास इत्यभ्युगमिते पञ्चदशदासान्तर्गते दासभेदे दासाश्च पञ्चदशविधाः मिता० दर्शिता यथा

"गृहजातस्तथा क्रीतोलब्धोदायादुपागतः । अनाकालभृतस्तद्वदाहितः स्वामिना च यः । मोक्षितोमहतश्चर्णाद्युद्धप्राप्तः पणेजितः । तवाहमित्युपगतः प्रव्रज्यावसितः कृतः । भक्तदासश्च विज्ञेयस्तथैव बडवाहृतः । विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः" या० ।